राजनीतिलीलाशताधिकम्

(संस्कृतकाव्यम्)

प्रणेता

डा० दीपक घोषः

१९९३

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११००५९

राजनीतिलीलाशताधिकम्

रचयिता—डा० दीपक घोषः
(कलिकाताविश्वविद्यालयसुरवाणीविभागे अध्यापनव्रतरतः)

भो राजनीते प्रणमामि तुभ्यं पुनः पुनस्ते पदयोः प्रणामः ।
अनन्तकीर्त्तीरमिताश्च शक्तीः शवनोमि मातुं न तव क्षमस्व ॥१॥
विचित्रवर्णा न विशेषवर्णा विचित्रमार्गा न विशेषमार्गा ।
विचित्रचित्ता न हि दुष्टचित्ता भो राजनीते भवती विचित्रा ॥२॥
जानीमहे नैव तव स्वरूपं का त्वं नु तन्निर्वचने न शक्तिः ।
तस्मादनिर्वाच्यपदाभिधेया वेदान्तमायेव विचित्ररूपा ॥३॥
उन्मोचनाय प्रभवो न हन्त त्वत्तत्त्ववित्प्राज्ञजना अपीह ।
कृष्णावगुण्ठस्य तवाधुनापि मूर्खा वयं के विषये भवत्याः ॥४॥
युवप्रिये धूम्रविलासहासे वि.फोरकाग्नेयपदार्थभूषे ।
इत्यादिसम्बोधनपूर्वकं तु प्रेम्णा जनास्त्वां मधुरं वदन्ति ॥५॥
शवाशना शान्तिविनाशदक्षा शोणप्रिया युद्धमहैकतृप्तिः ।
इत्यादिसंज्ञा अपि वा कदाचिदारोपिताः प्रेमवशाद् भवत्याम् ॥६॥
अपेतभीतिर्विनिवृत्तलज्जा प्रवञ्चिका स्वप्रियपोषिका च ।
संज्ञा इमाः स्युर्यदि वा भवत्यां नोन्मोचितं किञ्चिदपि स्वरूपम् ॥७॥
नेपथ्यदेशे न तु नाट्यमञ्चे तमिस्रपिण्डे न तु दीप्तिपिण्डे ।
पश्चात्प्रदेशे न पुरःप्रदेशे मन्येऽधिकस्ते स्थितयेऽभिलाषः ॥८॥
निःशब्दपादं समुपेत्य धीरं त्वं पृष्ठदेशादसिनाऽतिघाते ।
अनीप्सितानां निपुणासि देवि सोल्लासमेतत् क्रियते सुकार्यम् ॥९॥
दंष्ट्रा विषाक्ता निशिता भवत्या विभिद्य तूष्णीमति पृष्ठदेशम् ।
छिन्दन्त्यकस्मान्मृदुमर्मपुष्पमसंख्यखण्डैरिव हिंस्रशून्याः ॥१०॥
सरस्वतीलाभबलावलेपात् सारस्वता मूढधियो भवत्याः ।
कुर्वन्त्यवज्ञां न विविच्य सम्यग् भयावहञ्चापि फलं लभन्ते ॥११॥
सरस्वती ? साऽपि नियन्त्रिता त्वया त्वयैव लक्ष्मीर्विधृता कचेषु ।
सुरासुरा मर्त्यजनाश्च लीलया सर्वे भवत्या कवलीकृता हि ॥१२॥
यूनां कथा वा जरतोऽपि वामे तवास्थिरा यौवनगन्धमुग्धाः ।
आकृष्यमाणा उदरे लभन्ते स्थानं ततो यान्ति च दिव्यधाम ॥१३॥

शिक्षासु शिल्पेसु तथौषधेषु मनुष्यखाद्येषु च यत्र दृष्टिः ।
सर्वत्र पश्यामि दुरन्तमेकं फलानुमेयं तव भो प्रभावम् ॥१४॥
ग्रामस्य सर्वत्र तथा नगर्य्यां देशस्य सर्वत्र गृहे गृहे च ।
विद्यालये देवनिकेतनेऽपि फलन्ति वाञ्छाः कपटास्त्वदीयाः ॥१५॥
सर्वस्तरीयासु नृवृत्तिषु त्वं प्रशासने सचिवमन्त्रणायाम् ।
क्रीडास्थले नूतनशस्यपंक्तौ स्वच्छन्दतः क्रीडसि नापि लक्ष्या ॥१६॥
वाणिज्यमर्थः परराष्ट्रयोगः प्रशासनीयः सकलो विभागः ।
छायाभिभूतस्तव राजमानश्छायामयि त्वां प्रणमामि नित्यम् ॥१७॥
पवित्रविद्यालयतीर्थधाम शोणाक्तयुद्धस्थलतामुपैति ।
सुवर्णदेशश्च महाश्मशानं सर्वं सुभद्रे महिमा तवैव ॥१८॥
अंको जनन्या यदि पुत्रशून्य उच्छिन्ननकान्तं वनितासुवक्षः ।
छात्रा युवानश्चिरगेहहीनास्तवैव सर्वं महिमा सुभद्रे ॥१९॥
तवैव दौर्जन्यसमाश्रयाया अनुग्रहच्छायविवर्धिता ये ।
चौरास्तथा साहसिकाः समाजे भवन्ति चूडामणयस्त एव ॥२०॥
क्षुधं त्वंखाद्यं पुरतो निमेषाच्छून्यायते खे पुनरेति मर्त्ते ।
दुर्मूल्यरूपेण विदूषितं सत् किं नैन्द्रजालो महिमा तवाहो ॥२१॥
तृषार्त्तपानीयजलं रुणत्सि रुणत्सि कण्ठं कविगायकानाम् ।
निर्भीकवार्त्तापरिवेशकानां विपश्चितां सत्यदृशाञ्च राज्ये ॥२२॥
द्वारे समेतानिव भिक्षुकांस्त्व दुःस्थांश्चिकित्सालयतो नृशंसम् ।
मुमूर्षुदीनानपि ताडयन्ती न कम्पसे भूधरराजधीरा ॥२३॥
न लज्जसे कञ्चुककृष्णगात्रं रहो विधूत्य व्यवहारजीविनाम् ।
कर्त्तुं मुधैव व्यवहारकौतुकमभागमिदोषजनैः समं किम् ? ॥२४॥
तमःप्रियत्वावतिकौशलेन विद्युद्व्यवस्था विकलीकृता त्वया ।
विलोपिता दीप्तिरपीह सर्वतः कृतं च राज्यं स्वनिवासयोग्यम् ॥२५॥
वृत्तिच्युता वृत्तिगता भवन्ति वृत्तौ स्थिता ये तु ततश्च्युतास्ते ।
क्रीडाद्भुता क्रीडणकैस्तवैवा शिल्पेऽथवा शिल्पगता यदृच्छा ॥२६॥
वृत्तेश्च्युतानां हतभाग्यपुंसां स्त्रीपुत्रकन्याः स्वजनाः प्रियाश्चेत् ।
क्षुत्पीडिता घ्नन्ति ततः स्वमेव हेतुस्त्वमेवेति न विस्मरत्वम् ॥२७॥
दोदुल्यमानानि दलानि दोलालीलाविमूढानि करस्थितानि ते ।
आवर्त्तमानान्यधरोत्तरं वा चक्रारपंक्तिप्रतिमान्यनारतम् ॥२८॥

आसीत् किल ह्यो निखिलाधिकर्त्ता जगन्नियन्ता प्रभविष्णुसम्राट् ।
भुवि च्युतं चूतमिवैष सम्प्रत्यहो खतुंगा प्रभविष्णुता ते ॥२९॥
यदा विरोधे श्रमजीविनो रताः परस्परं निष्ठुरघातलिप्ताः ।
पैशाचिकानन्दरसाभिषिक्तं तवाननं सुन्दरि शोभतेतराम् ॥३०॥
अन्योन्यहत्याद्भुतरंगली लामत्तानिमानस्त्रकरानदूरे ।
निरीक्षमाणा कुरुषे स्वमास्यं किञ्चित् स्मिताभं परितृप्तचित्ता ॥३१॥
अन्योन्यहिंसाचरितार्थतार्थं ग्रामे यदा पर्णकुटीरमाला ।
जाज्वल्यते क्रन्दति कातरं च कस्यास्तदा दूरवनेऽट्टहासः ॥३२॥
आवृत्य धूम्रेण तनुं समग्रामुच्चैर्विमानेन दिवि भ्रमन्ती ।
विध्वंसलीलापरितर्पणार्थं संकल्पसे वा सहसा कदाचित् ॥३३॥
उडीयमानाद् रमसे विमानात् कृशानुपिण्डात् करुणात्तनादात् ।
सत्या इवांगानि परिक्षिपन्तीच्छिन्नानि भिन्नानि नृणां नृशंसम् ॥३४॥
दौरात्म्यलीला लभते प्रसारं दिवि स्थले वारिणि ते समक्रमम् ।
निमज्जयन्ती जलधावभागान् निमज्जसि ब्रह्ममहासुखे स्वयम् ॥३५॥
हा मेदिनीहृत्स्थितशोणमेदो लोलुप्यमाना हृदये त्वमस्याः ।
स्वा अङ्गुलीश्चालयसि प्रकामं बीभत्सहिंस्रा नखतीक्ष्णधाराः ॥३६॥
तवैव दौष्कर्म्यविषाक्तवायुना गर्भं धरण्याः परिदूष्यमाणम् ।
शिशून् प्रसूते विकलांगपंगून् नारी कथं त्वं न जुगुप्समाना ॥३७॥
अल भवत्या अकृपः कृपाणो रोषोग्रहिंस्रो निशिताग्रधारः ।
वक्षःप्रदेशस्य विखण्डनाय सहस्रधा शोणितधारमुर्व्याः ॥३८॥
विताडिता भिक्षुकवद् भवत्या प्रियाप्रियां पैतृकवास्तुभूमिम् ।
स्वां स्वां परित्यज्य चलन्त्यभागा लभामहे कुत्र समाश्रयं वा ॥३९॥
इति भ्रमन्तः शरणार्थिनस्तान् इतस्ततस्तत्परमेकमेव ।
याचन्ति वक्षो बहुधा विकृत्तं समाश्रयं हा धरणीजनन्याः ॥४०॥
विभ्रान्तमार्गाञ्छरणार्थिनस्तान् संरोद्धुकामा धरणीजनन्याः ।
विदार्य वक्षः कुरुषे त्वमेकां दुर्लंघ्यदुर्भेद्यविशालभित्तिम् ॥४१॥
विनिर्मिता सर्पिलभित्तिरेषा चिरं विनिर्मातु नृषु प्रभेदम् ।
स्रोतस्विनी शोणमयी रिणातु पुष्णासि संकल्पमिमं दुरुग्रम् ॥४२॥
काले गते स्नेहवशात् स्वयं तु प्राचीरभंगं कुरुषे त्वमेव ।
भेदो यथा सन्धिरपि त्वयैवं विधीयते स्नेहमयि प्रणामः ॥४३॥

दीनो धनाध्मातवपुर्मुहूर्त्तमज्ञो मुहूर्त्तं य द वाऽतिविज्ञः ।
क्षीणोऽपि तेजोऽतिशयाद् बलिष्ठः सर्वं न किं तत् तव भो महिम्ना ४४

तवैव शक्त्या खलु शक्तिमन्तः प्रसादधन्यास्तव सेवका ये ।
सावज्ञदृष्टिं नृषु निक्षिपन्तो धरां शरावं गणयन्ति नित्यम् ॥४५॥

सदम्भपादं प्रकटप्रतापं भ्रमन्ति भूवक्षसि निर्भयं ते ।
सदा जगच्छासनदण्डहस्ता मन्ये नृणां भाग्यविधायकास्ते ॥४६॥

तव प्रसादात् परिपुष्यमाणाः सर्वेश्वराः सर्वविदो भवन्तः ।
अनागसां नित्यनिपीडकास्ते विहाय लज्जां परितश्चरन्ति ॥४७॥

गृहे बहिः पाण्डववल्लभानां यदा विवस्त्रीकरणं महोत्सवः ।
दुःशासनैस्तैः प्रियसेवकैस्ते नारी कथं त्वं सहसे विलज्जम् ॥४८॥

हत्वा क्व संगोपयथ प्रियं मे मान्याः पितृव्याः पितरं समर्पय ।
उपाहसन्त्याकुलरोदनं तत् पुत्राभकाणां तव शिष्टशिष्यकाः ॥४९॥

निरन्तरं निर्दयशौनिकानामहो महोल्लासमिमे लभन्ते ।
पश्यत्सु वीरेषु विनायकेषु वराकपुम्भिः पणवन्दिभिश्च ॥५०॥

उद्दिश्य तान् भीतजना वदन्ति दूताः किमेते भगदद्यमस्य ।
किं पापभाजः परुषा नृपस्य किं रक्तबीजाः पुनरागता वा ? ॥५१॥

भक्तास्त्वदीया इति बोधमात्रं शतापराधानपि दुर्जनांस्तान् ।
प्रशासका रक्षिगणाश्च सद्यो मुञ्चन्ति कारागृहतोऽतिलज्जम् ॥५२॥

क्लीवीकृता रक्षिगणाः पुमांसो देशस्य सर्वत्र न चेद् भवत्या ।
दण्ड्येषु दण्डं न कथं तदैते प्रयोजयन्त्येव भयं विजित्य ॥५३॥

त्राणीयकार्य्ये तव पक्षपातः सुज्ञात एवापि च मर्मभेदी ।
न सेवका ये तव ते म्रियन्तां जीवन्तु ते ये तव सेवकास्तु ॥५४॥

तास्कर्यविद्या हि कलालला मं शिष्यस्त्वदीयैः कियदस्य लब्धम् ।
विज्ञातुमेतत् प्रतिवर्षमेकां निर्वाचनाख्यां कुरुते परीक्षाम् ॥५५॥

उत्तर्त्तुकामाः सफलं परीक्षां निर्वाचनाख्यामतिभीतभीताः ।
श्रीरामभक्तानुगतो हनूमानिवाचरन्ति प्रतिवर्षमेते ॥५६॥

प्रणामयोग्यः किमसौ न वेति शिष्टोऽस्तु दुष्टोऽस्तु न चिन्तयन्तः ।
निर्वाचकानां पदयोः पतन्ति बद्धाञ्जलि प्रेमभरेण नित्यम् ॥५७॥

महात्मने किं करवाणि तेऽहं सेवा त्वदीया वद का विधेया ।
सङ्कोचवर्जं कृपया वदेति ते किंकरान् स्वान् प्रतिपादयन्ति ॥५८॥

कदापि वा भिक्षुकवद् भ्रमन्ति ते निर्वाचकानां गृहतो गृहेषु ।
निर्वाचनप्रार्थनपात्रहस्तका 'निर्वाचने देहि जयं' ब्रुवन्तः ॥५९॥
'सर्वं मदीय त्वदधीनमेव तस्मात् सदात्मन् वद किं प्रदेयम् ।
अहं ग्रहीता तु भवान् प्रदाता जयाशिषं भो शिरसि प्रदेहि' ॥६०॥
इत्यालपन्तः प्रणयार्द्रकण्ठमभ्यस्तचाटूक्तिषु सिद्धजिह्वाः ।
एकान्तमात्मीयजनानिव स्वान् शेलूषशिष्यास्तव नाटयन्ति ॥६१॥
वत्सास्तवंवं बहुधाचरन्तो विवञ्चयन्तः सरलानबोधान् ।
सन्तोषयन्तो जननीं प्रियां त्वामन्ते लभन्ते विजयस्य माल्यम् ॥६२॥
निर्वाचनप्रार्थिसृतेष्वधन्यः प्राप्नोति कश्चित् सहसा भवत्याः ।
स्नेहाक्तमाल्योदरसुप्तसर्पसन्दंशनं हन्त विभीषणं वा ॥६३॥
स्वदेशमात्रेऽधिकपक्षपातस्तवैकनिष्ठस्य सुतस्य मातः ।
किमेतदेव स्खलितं नु तस्य ? दुर्ज्ञेयतत्त्वं हृदयं रमण्याः ॥६४॥
आसन्ननिर्वाचनमाल्यलोभादुल्लासधारारुधिराम्बयन्त्रैः ।
दीव्यन्ति ते रञ्जितसर्वदेहं हंहो वसन्तोत्सवसीधुमत्ताः ॥६५॥
दलं परित्यज्य दलान्तराय ते धावन्ति चित्रं कुलटास्वभावः ।
लब्धुं तवानुग्रहखण्डमेकं मांसैकखण्डं प्रति कुक्कुरा यथा ॥६६॥
नानादलीयास्तव सेवकास्ते परस्परं स्पर्धनमत्तमूढाः ।
परस्परं भर्त्सनताडनार्थं सम्प्रत्यतिक्रोशनतत्परा हा ॥६७॥
निर्वाचनप्राक्समये सकाशात् कुत्साधिदेव्यास्तव घोरशिष्यैः ।
कुत्साकलत्या निपुणं कियद् वा लब्धं परीक्षेत्यचिरं विधेया ॥६८॥
निर्वाचनप्रार्थिजनस्य का कथा माता पिता तस्य कलत्रपुत्रकाः ।
भवन्ति लक्ष्या अतिहेयकुत्सानिष्ठीवनस्येति महापरीक्षा ! ॥६९॥
मृत्युः कथं मे सहकर्मिबन्धोः स्वकार्यसिद्धौ विनियोजनीयः ।
क्वचित् कदाचिद् गणवक्तृतायामेकैव चिन्ता प्रतिबिम्बितेति ॥७०॥
केषां ? तवैव प्रिसवत्सकानां सदैकनिष्ठप्रियसेवकानाम् ।
मातुः स्वभावस्य हि दायभाजः पुत्राः सुशीला भुवने भवन्ति ॥७१॥
त्वदीयमायान्धजनैर्विमूढैः सत्यं हि मिथ्येत्यभिधीयमानम् ।
मिथ्या च सत्यं प्रतिपाद्यमानं सत्यानृते वा मिथुनीक्रियेते ॥७२॥
मिथ्याप्रचारे बहुलब्धशिक्षा मिथ्याप्रवादे भवदीयशिष्याः ।
घटं निमेषात् पटयन्ति चित्रं पटं पुनर्वा घटयन्ति सद्यः ॥७३॥

सभासु संघेषु तव प्रसादाद् भवन्ति मूका मुखरा अकस्मात् ।
तवैव नाम्नो महिमप्रचारे वन्दामहे त्वामयि वन्दनीये ॥७४॥
विचित्रहुंकारविदारकाणि नक्तन्दिवं कर्णनिरोधकानि ।
सघोषयन्त्रं भवति प्रचारं नान्यस्य नामानि तवैव यन्ति ॥७५॥
मर्त्तस्य कोलाहलवीचिघातात् स्वर्गस्य देवा अपि भग्ननिद्राः ।
औत्सुक्यविस्फारितकर्णनेत्राः पश्यन्त्यधस्ताद् घटते किमतत् ? ॥७६॥
'संपश्य कान्त प्रियमर्त्तलोके निर्वाचनाख्या महतो परीक्षा ।
नानादलीयाभिरिति ध्वजाभिर्विचित्रवर्णाकृतिभिः ससज्जा ॥७७॥
विचित्रहुंकाररवस्ततश्च कर्णं समुद्वेजयति प्रतिक्षणम् ।'
स्वस्वप्रियाभ्योऽपगते कुतूहल आलोचयन् देवगणा मिथस्तदा ॥७८॥
'त्रिलोकदेवी'ति समाह्वयाम वदाम देवीमथ राजनीतिम् ।
स्वर्गेऽपि कार्या प्रतिवर्षमित्थं निर्वाचनं नूनमियं परीक्षा ॥७९॥
अथ क्रमेणासुरलोकतोऽपि वज्रस्वरो मर्त्तमियाय देव्यै ।
'निर्वाचनं भो भविता कदेह ? पाताललोकस्तु न वञ्चनीयः' ॥८०॥
विचित्रवर्णाक्षररञ्जितानि रात्रिन्दिवं सेवकनिर्मितानि ।
प्राचीरगात्रे पथि-पार्श्वयोस्तु नान्यस्य नामानि तवैव भान्ति ॥८१॥
चिरं निरुद्धा ध्वजया तवैव तु दूरालयाः केवलवत्तिताडिताः ।
कर्मस्थलायोन्मुखनित्ययात्रिणो दुर्भोगभाग्या अयि लौहवर्त्मनि ॥८२॥
तवाङ्गुलीचालनतो मुहूर्त्तं चिरस्थिराश्चेच्छकटाश्चलन्तः ।
चिरञ्च रुद्धो यदि राजमार्गः सर्वं तदेतद्विजयस्तवैव ॥८३॥
वर्णाद्यशोभं सपताकयात्राः सनृत्यगीत तव सेवकानाम् ।
भवन्ति मार्गे गणरञ्जनाय रुद्धाध्वनां क्लान्तगृहोन्मुखानाम् ॥८४॥
विस्मृत्य सम्प्रत्यभिनीतिशिल्पं समुज्ज्वलच्छिल्पिसुचित्रतारकाः ।
अत्युच्चकैः कीर्त्तिदिवश्च्युतास्तव भो राजनीतेश्चरणं समाश्रिता ॥८५
स्थानाय ते पादसरोजयोश्च विसर्ज्य तौर्यत्रिकशिल्पचर्चाम् ।
अन्ये कलाशिल्पगुणाधिराजाः सर्वे हि धावन्तितरामलज्जम् ॥८६॥
अध्यापनञ्चाध्ययनञ्च शश्वद् विवेचितं यैस्तप एकमेव ।
धावन्ति ते ज्ञाननयस्विनोऽपि निर्वाचने त्वत्पदरेणुलोभाः ॥८७॥
दुर्लभ्यनिर्वाचनमाल्यलोभी धावत्यसौ मल्लयुयुत्सुवीरः ।
शारीरचर्चां परिहाय पश्चादास्फोटयन् बाहुयुगं स्मयेन ॥८८॥

प्राणव्ययेनापि च देशमातृकारक्षाव्रतं पूर्वकृतं विसर्ज्य ।
सीमान्तभूमिं परिवर्ज्य सैनिकास्त्वां मातृकां पूजयितुं प्रवृत्ताः ॥८९॥
क्रीडांगणं शून्यमतो विशारदै रणांगणं वीरभटास्त्यजन्ति ।
मन्त्री गतः क्व सचिवः क्व वास्ते कार्याधिकारा मरुवद्भ्रमन्ति च ।९०

एव तवाङ्घ्रिस्फटपङ्कजामृतनिष्यन्दविन्दून परिलेढकामाः ।
एकैकशो देशविशिष्टशिष्टा निर्वाचनप्रार्थितया समेताः ॥९१॥
पाथोजपत्रैश्चिरबद्धभृङ्गदशा तु किं स्यात् परिणाम एषाम् ।
केयं भवत्याभिनवा परीक्षा निर्वाचनाख्यातिविमूढपुंसाम् ॥९२॥
निःशेषकोषीकुरुषे क्रमेण राष्ट्रं ततस्तत्परिपूरगाथम् ।
निःशेषमुद्रं कुरुषे प्रजश्च निर्वाचनं नाम महेश्वरेक्षा ॥९३॥
निष्कर्षतां माध्यमतो दिनानि नेतुं सदा बन्ध्यदशां स्वदेशे ।
कुर्वन्ति चित्रं कटिदेशबन्धं तव प्रसादात् सफला भवन्ति ॥९४॥
दिनेषु 'बन्ध्येषु' महासुखेन महावकाशं किल यापयन्ति ते ।
विस्रब्धमालापरता गृहेषु क्रीडारताः सुप्तिगताः कदापि वा ॥९५॥
के ? ये जना मासिकवृत्तिजीविनस्ते भाग्यवन्तोऽपि च पुण्यवन्तः ।
ते प्रार्थयन्तेऽतिसमुत्सुका अहो कदा समायात् पुनरीदृश दिनम् ॥९६॥
प्रायेण ये दैनिकवृत्तिजीविनः पण्येन मार्गेऽपि तु ये द्वरिद्राः ।
नयन्ति हा 'बन्ध्य'दिनानि कष्ट प्रायो निरन्ना निरुपार्जनास्ते ॥९७॥
नैष्कर्म्यनैराश्यविलुप्तलक्ष्या भ्रान्ता वृथाटयाभिरता विलोक्य ।
मार्गे युवानो विपणीनकस्माद विश्रामलाभाय विशन्ति तत्र ॥९८॥
क्लान्तिक्षुधाक्षाममुखा भवत्यामन्योन्यमालापमयाः सुखेन ।
मातस्तवाङ्कोहितमस्तकास्ते सुषुप्तिशान्तिं क्षणिकामुशन्ति ॥९९॥
न वेत्सि वृद्धं न शिशुं न नारीं नार्त्तं न दीनं न तु वेत्सि मित्रम् ।
न वेत्सि किं स्वानपि वत्सकांस्ते स्वमेव वेत्सीह भवां विचित्रे ॥१००॥
राजा नु कोऽन्यो भवती हि राजा पुमान् नु कोऽन्यो भवती पुमान् हि
विश्वेतिहासो विहितस्त्वयैव त्वयैव धन्ये रचितं पुराणम् ॥१०१॥
राजा हि नीतिष्विति 'राजनीति'संज्ञेति मन्ये मधुरा भवत्याः ।
मा भूद् भवत्यामणुमात्रनीतिर्दन्तेषु राजेति हि राजदन्तः ॥१०२॥

गुणागुणानां गणनं न कृत्वा नीत्या विहीने किमु राजनीते ।
प्रसादवृष्टिं कुरुषे स्वतन्त्रे स्वल्पेषु भक्तेषु सुदुर्लभां वा ।।१०३।।
न रोचमानाः खलु ये भवत्यै वशं गता नापि च ये भवत्याः ।
अज्ञातहेतोर्भवती विरुष्टा तेषां तु भाग्ये महती विनष्टिः ।।१०४।।
कृष्णावगुण्ठावरणान्तराले गूढं ज्वलद्रक्तसकोपनेत्रम् ।
प्रत्याहरातीव भयाकुलोऽस्मि प्रसीद रुष्टे मयि भो प्रसीद ।।१०५।।
अभीष्टभोज्यं तव जीवमांसमभीष्टपेयं च कवोष्णशोणम् ।
निवेद्यते भक्तिभरेण तृप्त्यं भोज्यं च पेयं च गृहाण चण्डि ।।१०६।।
क्षमस्व देवीह कृतापराधं याचे न विद्यां न यशो न वित्तम् ।
लब्ध्वा प्रसादस्य कणं भवत्या धन्यो भवेयं जननान्तरेषु ।।१०७।।
त्रिलोकविश्वं क्रमजन्मवृद्धेविस्फोरणेनोत्स्फुरितं प्रचण्डम् ।
विस्फोरकब्रह्ममहास्त्रघातं त्रायस्व शक्ते कृपया निरुध्य ।।१०८।।
लीलव कैवल्यमिदं तु लौकिकं सर्वं त्वदीयं विदितं विवर्णितम् ।
नान्यस्तवोद्देश इहास्ति कश्चन लीलामयि त्वं प्रणतिं गृहाण नः १०९
विश्वेतिहासं रचय क्षणे क्षणे लीलाविचित्रं सततं शत शतम् ।
शास्त्रं पुराणं विविध नवं नव सञ्जीव मातस्त्रिभुवां युगे युगे ।।११०।।
भगवति भवतीति प्रार्थये राजनीते
शतदलमिव विश्वे शोभतां नाशहीना ।
शतशतदलभिन्ना विन्दमाना विकाश
प्रसरतु मधुगन्धो दिग्दिगन्ते भवत्याः ।।१११।।

इति स्वर्गत'सुखरञ्जनघोष''प्रफुल्लनलिनीघोष'जाययोः पुत्रेण
कलिकातानिवासिना श्रीदीपकघोषेण विरचितं
'राजनीतिलीलाशताधिकम्' इत्यभिधम्
आधुनिकं संस्कृतखण्डकाव्य
समाप्तम् ।